# क्त्वातुमुनोर्व्यवहारः

**भुवनेश्वरकरशर्मा**

'तुमुण्वुलौ क्रियायां क्रियार्थायाम्' क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोस्तुमुण्वुलौ स्तः। क्रिया एव अर्थः प्रयोजनं यस्याः सा क्रियार्था। क्रियार्थायां क्रियायाम् उपपदे भविष्यत्यर्थे तुमुन् स्यात् ण्वुल् च। यथा-कृष्णं द्रष्टुं याति। कृष्णकर्मकं भविष्यतिदर्शनार्थं यानम्। अत्र यानक्रियायाः दर्शनं प्रयोजनम्। अतो दृशेस्तुमुन्। द्रष्टुमिति पदस्य याति इति पदस्य च कर्ता एकः सः खलु डित्थो डवित्थो वा यः कश्चित् भवतु। अतः समानकर्तृकतायां तुमुन् ण्वुलो विषयः नात्र विचार्यः।

पुनश्च समानकर्तृकेषु तुमुन्, इच्छार्थेषु एककर्तृकेषु उपपदेषु धातोस्तुमुन् स्यात्। यथा इच्छति योक्तुम्, वाञ्छति योक्तुम्, कामयते योक्तुम् इत्यादि। भोजनक्रियायाः इच्छतेश्च एकः (समानः) कर्ता, यथा वा 'पिनाकपाणिं पतिमाप्तुमिच्छति' (कुमारसंभवम्)-वाक्येऽस्मिन् आप्नोतेः इच्छतेश्च आहार्यं पार्वतीपदम् एकमेव कर्तृपदम्। अतः समानकर्तृकत्वात् आप्नोतेः इच्छार्थे तुमुन्। एवं क्रियार्थक्रियायाम् उपपदे तुमुन्, इच्छार्थे च तुमुन् इति विधिद्वयमुपस्थापितम्। उभयत्र समानकर्तृकता।

तृतीयो विधिस्तु 'शक घुष ज्ञा ग्लै घट रभ लभ क्रम सह अर्ह धातुषु अस्त्यर्थेषूपपदेषु धातोस्तुमुन् स्यात्'। यथा-शक्नोति भोक्तुम् अस्ति भवति विद्यते वा भोक्तुमित्यर्थः, एवं घुष्णोति, जानाति, ग्लायति, घटते, आरभते, लभते, प्रक्रमते वा भोक्तुम् इति व्यवहर्तुं शक्यते इहापि कर्ता कश्चित् ऊह्यः-अतः समानकर्तृकतायां तुमुन्।

चतुर्थं सूत्रं 'पर्याप्तिवचनेषु अलमर्थेषु', पर्याप्तिपदं पूर्णताद्योतकम्। 'अलं भूषणपर्याप्तिशक्तिवारणवाचकम्' इत्यमरः। पर्याप्तो योक्तुम्। पटुकुशलप्रभृतयोऽपि शब्दाः अलमर्थाः पर्याप्तिवाचकाः। योक्तुं समर्थ इत्यर्थः। सः भोक्तुं प्रवीणः इत्यपि उदाहार्यम्। पुनरपि उद्ध्रियते 'लिखितमिह ललाटे प्रोज्झितुं कः समर्थः' (हितोपदेशः) आद्योदाहरणे कर्ता ऊह्यः, अन्तिमे स्पष्टः। अत एव समानकर्तृकतायां तुमुन्।

ततं आयातं पञ्चमं सूत्रम्-'कालसमयवेलासु तुमुन्'। भोक्तुं कालः, भोक्तुं समयः, भोक्तुं वेला, क्रियायाः अभावेऽपि अर्थावबोधः। भोक्तुं कालः आगतः, समय आगतः, वेला आगता इति क्रिया आक्षेप्तुं शक्यते। आगत इत्यस्य एव कर्ता कालः न तु तुमुन्नन्तस्य भुजेः। अत एव इह समानकर्तृकता नास्ति, परन्तु तुमुन् विहितः, सूत्रमिदं पूर्वसूत्राणां 'समानकर्तृकेषु एव तुमुन्' इति विधेः काठोर्यं लघ्वीकरोति।

अन्यत् पुनर्द्रक्ष्यामः-'समानकर्तृकयोः पूर्वकाले' इत्यनेन क्त्वाप्रत्ययो विहितः। वक्ष्यमाणोदाहरणेष्वपि समानकर्तृकतायाः स्खलनम्।

१. केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशकेशि।

२. 'मत्प्रसूतिमनाराध्य प्रजा ते न भविष्यति' (रघुवंशः)

३. दृष्ट्वेमं स्वजनं कृष्ण —— सीदन्ति मम गात्राणि। (भगवद्गीता)

४. वीक्षितस्त्वमसि मा मया गन्तुं
तन्मनुष्यजगतेऽनुमनुष्व। (नै. पू. ४२)

५. आकाशवाण्या प्रचारितासु संस्कृतवार्तासु समानकर्तृकत्वाभावेऽपि तुमुनो व्यवहारः मया श्रुतः, यथा दुर्नीतिविषयान् विचारयितुं मुख्यन्यायाधीशं प्रधानमन्त्री आमन्त्रयति।

६. अस्माकमुत्कलप्रदेशे पण्डितमायाधरदाशवर्यैः सङ्कलिते माध्यमिकशिक्षार्थमुद्दिष्टे व्याकरणसङ्ग्रहाभिधेये ग्रन्थे पठितुं प्रेरयति पाठयति, गन्तुं प्रेरयति गमयति इत्यादीनि समानकर्तृकत्वाभावद्योतकानि विग्रहवाक्यानि दर्शितानि, बहुवर्षाणि यावत् व्याकरणसङ्ग्रहोऽयं माध्यमिकशिक्षापरिषदा गृहीत आसीत्।

कियद्भ्यो वर्षेभ्यः पूर्वं तयैव परिषदा प्रकाशिते संस्कृतव्याकरणे तुमुनः समानकर्तृकतामादृत्य पूर्वविग्रहमपाकृत्य पठन्तं प्रेरयति पाठयति, गच्छन्तं प्रेरयति गमयति इत्यादि।

इदानीं वयं चिन्तयामः प्रेरणा कदा आवश्यकीति। यदा कश्चन 'गमिष्यामि न वा' इति द्वन्द्वे पतितः अथवा अनिच्छन्नास्ते, तदानीमेव प्रेरणाया अवसरः, गच्छन्तं प्रेरयति इति वाक्ये गमिक्रियावान् (गन्ता) स्वेच्छया एव गच्छति। अतस्तस्य प्रेरणाया आवश्यकता नास्ति। गच्छन्तं प्रेरयति गमयति, पठन्तं प्रेरयति पाठयति इत्यादिप्रयोगः 'केवलं हेतुमति च प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच् स्यात्' इति सूत्रवृत्तिमादृत्य, तदुदाहरणं भवन्तं प्रेरयति भावयति इति दृष्ट्वा तत्पथानुसरणस्य फलम् भवतेः शतरि द्वितीयैकवचने भवन्तमिति रूपम्।

पूर्वं प्रकाशितानि उदाहरणानि विविच्य एतदेव वक्तुं शक्यते यत् क्त्वातुमुनोः प्रत्ययावसरे समानकर्तृकतायाः काठोर्यं शनैः कालक्रमेण शैथिल्यमुपगतम्। महाकविप्रभृतीनां प्रयोगाः अत्र प्रमाणम्। स्वयं मुनिः पाणिनिरपि 'कालसमयवेलासु तुमुन्' इति सूत्रं निर्माय समानकर्तृकताया अभावेऽपि तुमुनः प्रयोगं दर्शयति।

अत एव गन्तुं प्रेरयति गमयति, पठितुं प्रेरयति पाठयति इत्यादिविग्रहणं ग्रहणीयं मन्ये। भवतु नाम तुमुन् विधानं प्रति समानकर्तृकताया विधेर्ग्रहणं साधोयाः, अग्रहणमपि ईदृक्स्थाने नासाधु, नैव दूष्यमिति मे मतम्।।

---